P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-3* ISSUE-9*(Part-2) December- 2018
E: ISSN NO.: 2455-0817 Remarking An Analisation

# वैदिक साहित्यस्य पुनरावलोकनम्



**अनिल बी. माछी**
सहायक प्राध्यापक,
संस्कृत विभाग,
पंचमहल्स आर्ट्स कॉलेज,
देवगढ बरिया, दाहोद,
गुजरात, भारत

**सारांश**

अस्माभिः विचारणीयमं यत् शास्त्रं नाम किम्? शास्त्रं इत्युक्ते किम्?
भगवता श्री कृष्णेन गीतायां उक्तम् –

ज्ञात्वा शास्त्रविधानोक्तं कर्मकर्तुमिहार्हसि।
तस्मात् शास्त्रप्रमाणं ते कार्याकार्यव्यवस्थितौ।।

अर्थात्– शास्त्रेण यत् उक्तं तत् प्रमाणभूतं मन्यते। व्यवस्थिततया अर्थात् किं कर्तव्यं किं कर्तव्यम् इति तस्य दिक् सूचनं स्पष्टीकृतं भवति।

**मुख्य शब्द :** वैदिक साहित्य, संस्कृत भाषा, व्याकरण, छन्दशास्त्र, वेदांग

**प्रस्तावना**

यथा शढविहिनानौका समुद्रे वायोः वेगेन इतस्ततः गमनागमनं करोति तथैव शिस्तहिनः छात्रः अपि। शिस्तविहिनस्य छात्रस्य अस्मिन् धोरे संसारे नौकावद् एव जीवनं भवति। यथा 'आचारः प्रभवो धर्मः' इति शास्त्रे उक्तं तथैव पालनमपि भवेत् चेत् व्यक्तिः कदापि विवके भ्रष्टः न भवति। द्वितियं शास्त्रम् अस्मभ्यं न्यायः, सत्यं, दया, पवित्रता इत्यादीनाम् उपदेशं ददाति। येन जीवने सदाचारः नैतिकतादिनि मूल्यानि समागच्छति। यस्य किमपि मूल्यं नास्ति तस्य समाजे कापि उपयोगिता न भवति।

यथा सुवर्णस्य मूल्यम् अधिकमस्ति। कारणं तस्य अग्निपरिक्षा भवति तदा तत् सुवर्णं शुद्धता प्रदर्शयति। तदर्थं सुवर्णाभूषणानां मूल्यं भवति। तथैव अनेकानाम् ऋष्मिहर्षिणां बहुवर्षाणाम् अभ्यासेन संषोधनेन परीक्षणेन च शास्त्राणां रचनाः अभवत्। एतानि शास्त्राणि अधुनापि तथैव उपयोगाय भवन्ति। एतदर्थं शास्त्राणां संरक्षणं नैतिकं कार्यं वर्तते।

शास्त्राणां चर्चायाः अन्ते अस्माकं शास्त्राणि अपि विश्वस्य सर्वासु संस्कृतिशु प्राचीनतमानि सन्ति। सहस्त्रवर्षेभ्यः प्राक् अस्माकं वैदिकसंस्कृतिः उद्भूता। एषा संस्कृतिः पुरातना सत्रपि सर्वप्रथमं स्थानं भजते। अस्माकं वेदाः ब्राह्मणग्रन्थाः आरण्यकग्रन्थाः, उपनिषदः च अवगन्तुं ज्ञातुं संस्कृतभाषाज्ञानम् अतीवावश्यकम्।

संस्कृतभाषायां या वैज्ञानिका पारदर्शिता परिख्यात्मकता च आलेखिता वर्तते सा जगत्यस्मिन् नास्ति कस्यामपि भाषायाम्। अत एव संस्कृतभाषा सर्वाषां भाषाणां जननी वर्तते। विश्वे यथा प्रथमं मातुः स्थानम् तथैव भाषासु संस्कृतभाषा। अनेकाः भाषाः उद्भूताः, विकसिताः कालक्रमेण लुप्ताः जाताः। तथैव एतस्याः संस्कृतभाषायाः उपरि अपि बहुनि आक्रमणानि अभवन् तथापि न नष्टा न च मृता। अतः इयं भाष अमृतभाषा वयचनामृतस्य पुत्राः।

भाषायाः विकासार्थं सर्वप्रथमं एषा भाषा व्यवहारिका भाषा भवेत् तदर्थं पुरूषार्थस्य सहयोगस्य आवष्यकता वर्तते। भाशैषा प्रत्येकजनस्य ह्रत्सु येन–केन स्वरूपेण संगृहितास्ति। किन्तु आवस्यकता वर्तते तस्याः बहिरागमनम्।

यथा अर्धज्वलितस्य अंगारकस्योपरि भस्यमः प्रसारितः भवति अर्थात् अन्तस्थितोऽग्निः दृष्यमानं न भवति किन्तु अग्निः तु वर्तते एव। अतः भस्मनिःसारणं कर्तव्यम्। तथैव संस्कृतभाषायाः कृते अस्माकं ह्रत्सु संस्कृतस्वरूपाग्निः तु वर्तते एव किन्तु तस्योपरि भस्माच्छादनं संजातं तं निष्कासयितव्यम्

भाषायाः संरक्षणार्थं सर्वप्रथमं सोपानम् अधिकाधिकाः जनाः एतां भाषां वदेयुः। गृहस्थः शिशुः किमपि अपठित्वा एव पिता, माता, गौ, भ्रातादयः शब्दानाम् उच्चारणं करोति तस्य कारणं गृहे शृणोति तद् सः वदति। अर्थात् भाषायाः प्रथमं सततं तस्याः भाषायाः श्रवणमेव। पश्चात् तस्यां भाषायाः व्यवहारः शिशुः वाक्यं शब्दं वा किमपि उच्चारयति तदा वयं हर्षमनुभवामः। तथैव समाजस्य कोऽपि जनः संस्कृतम् वक्तुं प्रयत्नम् करोति ईच्छां वा प्रकटयति तदा संस्कृतैः तस्मै सहकारः प्रदातव्यः प्रेरणा दातव्या।

सहस्त्राधिकाः संस्कृतविद्यालयाः एकादशविश्वविद्यालयाः भारते विद्यमानाः सन्ति। तेशु कार्यरताः छात्राः अध्यापकाः च सर्वे यदि सरलतया संस्कृतमाध्यमेन व्यवहारं कुर्युः चेत्

अवष्यं संस्कृतभाषायाः विकासः भविष्यति। तथा वयं सफलाः भूत्वा अग्रे गमिष्यामः।

**अध्ययन का उद्देश्य**

शास्त्रशब्दस्य व्युत्पत्तिः शास् धातोः भवति अर्थात् शासनं क्रियते। अनुशास्यते अधिकारीछात्राय शिष्यद्वारा नियमानुसारं वा यस्य अध्ययनं भवति तत् शास्त्रम्। तथा तदनुगुणं जीवनं अर्थात् शास्त्रानुसुचितमार्गोपरि चलनम्। अनुशासनं प्रत्येकस्य व्यक्तेः कृते अतीवावश्यकम्।

ई.स. २०००तमे वर्षे देहल्यां जाते *अखिलभारतीयसंस्कृतषिक्षकाधिवेषने* उक्तं तदनुसारं भारते केवलं १ प्रतिशत् जनाः आलंगभाषां जानन्ति तथा ते एव समग्रदेशेस्य संचालनं कुर्वन्ति। ३ प्रतिशत् जनाः संस्कृतज्ञाः किन्तु तथापि संस्कृताय न्यायं न ददति।

भाषाविकासार्थं प्रथमं श्रवणं द्वितियं भाषणम् अन्ते तृतियं भाषासाहित्यपठनम् अवगन्तव्यम्, अध्यापनं कर्तव्यम्। एतस्याः भाषायाः विशेषता अस्ति लाधवत्वम्। अर्थात् अर्थः विशालः वाक्यं लधुः यथा—

मातृदेवो भव,
पितृदेवो भव,
आचार्यदेवो भव,
सत्यं वद,
धर्मं चर,
स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्।

एताषां सूक्तानां स्वरूपं लधुः अर्थभावना च विषाला वर्तते।

संस्कृतभाषा अस्मिन् युगे अर्थकारी वर्तते। अस्याः पठनेन योग क्षेमस्य प्रश्नोऽपि निर्वायते। अनेन मार्गेण भाषाविकासः भविष्यति। कस्याः अपि भाषायाः विकासार्थं भाषायै राज्याश्रयः प्राप्तिः आवष्यकी। पूर्वकाले राजाभोजस्य समये संस्कृतभाषायाः विकासः अभवत्। कालिदासायः कवयः पण्डिताः साहित्यसर्जनेन अमरत्वं प्राप्ताः। कारणं तदा ते राज्येण पुरस्कृताः। तथैव आधुनिके समयेऽपि संस्कृतभाषायैः राज्याश्रयः प्राप्तिः स्यात्। तदा नूतनस्य साहित्यस्य सर्जनं भवेत्। अस्मिन् २१तमे शतके संस्कृताय राज्याश्रयं न भवेत् चेत् संस्कृतस्य विकासस्य संभावनाः क्षीणाः भविष्यति।

भाषायाः विकासार्थं समग्रे देशे चिन्तनं भवेत् तथा तत् सामुहिकम् चिन्तनम् प्रजाभिमुखम् भवेत् येन प्रजाः जागृताः स्युः संस्कृतं पठेयुः जानीयुः इति अस्माकं भावना। भाषाविकासाय माध्यमम् अत्यावष्यकं, संस्कृताध्ययनं संस्कृ तेनैव। अर्थात् संस्कृतभाषया एव संस्कृतस्य पाठनम् भवेत्।

अस्माकं दुर्भाग्यं वर्तते यत् अद्यापि वयं मैक्समुलर, गेटे इत्यादिभिः विदेषियविद्वद्धिः रचितानि पुस्तकानि पठामः। वयं पण्डिताः च भवामः अनया एव अनुवादात्मकपद्धत्या।

शास्त्रं नाम भगवदाज्ञा। बाधुलस्मृतौ उक्तं श्रुति–स्मृतिममैवाग्रे अर्थात् श्रुति नाम वेदः ममैव आज्ञा। आज्ञा शब्दस्य पर्यायवाचकः शब्दः शास्त्रम, शास्त्रशब्दस्य परिभाषाः—

'निर्देषग्रन्थयोः शास्त्रं निदेशेः आज्ञा।' अमरकोशः ३–३–१७

उक्तवचनैः स्पस्टं भवति यत् स्मृतयः भगवतः आज्ञाऽस्ति। तथा तदैव शास्त्रं कथ्यते।

महर्षि पराषरस्य मतानुसारं भगवता प्रदताज्ञा केवलं अस्माकमेव न अपितु संपूर्णस्य विश्वस्य कल्याणार्थम् अस्ति। 'षासनाच्छासनाच्छास्त्रम्' इति। लघूत्तरं बृहत्तरं ग्रामं राष्ट्रं वा भवेत् किन्तु तस्य सुचारूव्यवस्थार्थं नियमादिनामावस्यकता भवति एव। तर्हि विनसय संचालनार्थं भगवता निर्मितं विधानमेव शास्त्रम।

प्रवृतिश्च निवृतिश्च पुंसां येनोपदिश्यते।
तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः।।

अर्थात्— यस्मिन् प्रवृत्तिः निवृत्तिः धर्मोपदेशेम् उपदिष्यते तत् शास्त्रमुच्यते।

पूर्वोक्तानुसारं शास्त्रण्यस्माकं कृते उत्तमं जीवनं कया रीत्या जीवेम इत्यस्य पथ प्रदर्शकानि सन्ति। तादृशानां शास्त्राणां संरक्षणं भवेत्। संरक्षणार्थं आधुकोनिपाये प्राचीनग्रन्थानां लेमीनेशनम्, द्वितियावृत्तिः, पुनः प्रकाशनम् करणीयम्। एतेषां ग्रन्थानामध्ययनार्थं छात्रेभ्यः प्रोत्साहनं दातव्यम्।

अस्मिन् वैज्ञानिके युगे आधुनिकोपायैः ग्रन्थानां विडियोग्राफीसिडी, डिविडि आदिभिः माध्यमैः संरक्षितुं षक्यते।

शास्त्ररक्षणद्वारैव संस्कृत भाषा रक्षितव्या कारणं माहाभरतानुसारं—

'यदिहास्ति तद् अन्यत्र यन्नेहास्ति न तत् क्वचित्।'

अर्थात्— अस्माकं शास्त्रेषु यत् दर्शितं तदैव समग्रे विश्वे वर्तते। यत् भारतीयशास्त्रेषु न वर्तते तद् कुत्रापि भवितुं न षक्नोति। इत्युक्ते अस्माकं शास्त्रे जीवनपद्धतिः, मानवमुल्यानि, शिक्षण पद्धतिः, पंच्चतत्वानि, वृक्षायुर्वेदः, खगोलं, भुगोलं, वैदकं च निहितम्।

साम्प्रते विश्वे यदा भूकम्पस्य, झंझातातस्य, जलस्य, वातावरणस्य समस्याः सन्ति। याभिः समस्याभिः विश्वस्य पर्यावरणम् असंतुलितं भवति। एताषां समस्यानां निवारणं अस्माकं प्राचीनऋषिमुनिभिः रचितेषु ग्रन्थेषु उट्टकिंतमस्ति।

अतैव शास्त्राणां सरक्षणं संस्कृतभाषायाः संरक्षणम् अतीवाष्यकम्।

वेदानां प्राचीनता आलोचना तथा मतभेदविषयः वर्तते। भारतीय प्राचीनं परम्परानुसारं वेदानां रचनाकालस्यनिर्धारणम् असम्भवमस्ति। तथापि इतिहासकर्तृणां सर्वमान्यसिद्धान्तमस्ति यत् वेदप्राचीनतमं ज्ञानपुज्जीपलब्धाद्यसंग्रहमस्ति। एकः भारतीय इतिहास कर्ता अविनाषः चन्द्रदासस्यानुसारं वेदानां रचना ई.स पूर्व २५० तः ७५० मध्ये कस्मिचित् काले गतः। लोकमान्य तिलकस्य अनुसारमस्यापुमानितसमयः ई.स पू. म्यूतः ५० शतके मध्ये जातः। एतत् मतं प्रो. डौग, प्रो. लुडविग तथा प्रो. याकोबी स्थापनाभिः मिलति। प्रो. व्हिलटनी अस्य रचनाकालम् ई.स पू. १५ तः २० शतकेस्य मध्यं मन्यते, प्रो. मैक्समूलरस्य विश्वासम् अस्ति यत् वेदरचना ई. स पूर्वं १३ शतके जाता। बृहदारण्यकोपनिषदानुसारं चत्वारः वेदाः ऋग्वेद, यजुर्वेद, सामवेद च अथर्ववेदः परमपितुः निःष्वासमस्ति।

अस्य महतो भूतस्य निःस्वसितम् एतद् यत् ऋग्वेदः।
यजुर्वेदः सामवेदोऽथर्वागिरसः।।

मनुस्मृत्यानुसारं वेदः ज्ञानस्य आलोकितमस्ति, इति विश्वासंः कृतः। तेन कारणेन तं वेदव्यासमुच्यते। चतुर्वेदाः नानाप्रकाराणां मण्डल–अष्टक–वर्ग–सूक्त–अनुवाक्–खण्ड–प्रश्न–छन्ददिसु विभागेषु विभाजिताः कृताः। वेदस्य पद्यात्मकं तथा गद्यात्मकरचनाप्रत्येकशब्दःविगण्य निश्चितः कृतः। मन्त्राणां सम्पूर्णं संग्रहं 'संहिता' उच्यते। एकस्य मतस्य अनुसारं वेदशब्दःमन्त्राणां संकलनं तथा ब्राह्मणम् त्रिषु विभागेषु विभक्तमस्तिः। १. ब्राह्मण २. आरण्यकः ३. उपनिषद्। ब्राह्मणेषु विभिन्नप्रकाराणां यज्ञाः तेषाम् अनुष्ठानं तथा विधिनां विस्तृतवर्णनमेवं व्याख्यास्ति। आरण्यकानां गुहयज्ञानं केषाश्चित् दीक्षितव्यक्तिनां कृते अस्ति तथा उपनिषत्सु वेदे समाहितज्ञानप्रतिपादनमस्ति। उपनिषदां व्यवस्थिरित्या प्रस्तुतकरणाय ऋषिः बादरायणः व्यासेन ब्रह्मसूत्रं वा षारीरिकसूत्ररचना अकरोत्। तथा महान महाभारतस्य अंषस्य रूपे भगवदगीतारचना जाता येन उपनिषदां सारतत्वं मन्यते। उपनिषद् ब्रह्मसूत्रं तथा भगवद्गीतायाः समष्टिं 'स्थानत्रयी' उच्यते।

वैदिकसाहित्ये मुख्यरूपेण मंत्रसंहिता ब्राह्मण–आरण्यक–उपनिषदः समावेषं भवति। मन्त्रसंहिता ज्ञातुं ब्राह्मण–आरण्यक–उपनिषदाम् अध्ययनमावष्यकं मन्यते, तथा ब्रह्मसूत्रं तथा भगवद्गीताध्ययनमपि आवष्यकं ज्ञापयति। वैदिकसाहित्ये षड्रचनारपि सम्मिलितमस्ति यत् वेदं ज्ञातुं सहायक मन्यते। तं शिक्षा –कल्प–व्याकरण–छन्दश्च ज्योतिषस्य नाम्ना ज्ञायते। एतेषु प्रत्येकं वेदांगामुच्यते।

वैदिकयज्ञकर्मकांण्डात् सम्बन्धितं वेदांगां कल्पमुच्यते। कल्पः वेदांगासूत्रेषु अस्ति, अतः संक्षिप्तता अस्य विशेषता अस्ति। समस्तकल्पवेदांगा तथा अस्य साहित्यं त्रिस्तरियमस्ति, अस्मिन् श्रोतसूत्रं गृहयसूत्रं तथा धर्मसूत्रं सम्मिलितमस्ति। प्रत्येकवेदाय भिन्न–भिन्नप्रकाराणां श्रौतगृहय–धर्मसूत्रश्च अस्ति। षांख्यायन–आष्वालायन–औयस्तम्ब–बौधायन–कात्यायने च प्रसिद्धं श्रोतसूत्रमस्ति। गृहयसूत्रेषु षांख्यायन, गोभिलं, औयस्तम्ब, बौधायन, हिरण्यकेषी, बौधायन, काठक, पारास्कार, कौषिकादिः षामिलमस्ति। धर्मसूत्रेषु गौतम–आपस्तम्ब–हिरण्यकेषी–बौधायन'वषिष्ठ धर्मसूत्राणां गणनां क्रियते।

कल्पसूत्राणामेतासां श्रेणिनामतिरिक्तं षुल्बसूत्रनामकचतुर्थश्रेणी अपि अस्ति येन प्राचीन ज्वामितिशास्त्रोदगमं मन्यते। औपस्तम्ब–बौधायन–कात्यायनै त्रिणि षूल्बसूत्राणिसन्ति कल्पं वेदांगवत् अन्यवेदांगानामपि सहायकं साहित्यमस्ति। यत् सर्वमन्यमकिधकविषयं मिलित्वा विस्तृतवैदिकसाहित्यनिर्माणं करोति। इतिहास–पुराण–वैदिकदर्षनसंप्रदायमपि वैदिकसाहित्यांगां मन्यते।

यथा उपरी कथितमस्ति यत् वैदिकसाहित्यबीजत्वमंत्र संहिता–ब्राह्मण–आरण्यक –उपनिषद् च अस्ति।

वेदेषु ऋग्वेदस्थानमप्रतिममस्ति। अस्मिन् १० मण्डलानि तथा १०१७ सूक्तानि सन्ति। ऋग्वेदमन्त्राणां सम्पूर्णसंख्या १०,५८० अस्ति। ऋग्वेदषब्दानां संख्या तथा अक्षराणि अपि विगणितानि सन्ति। अस्मिन् षब्दानां संख्या १,५३,८२३ तथा अक्षराणां संख्या ४,३२,८२६ अस्ति। अत्रि तथा मधुच्छन्दसच प्रमुखमस्ति। एकांकी एकः ऋषि वा अस्य परिवारस्य ऋषिणां स्तोत्राणां कृते षड्मण्डलानि निर्धारितानि सन्ति।

यजुर्वेदस्य भागौ स्तः कृष्ण–षुक्लौ यजुर्वेदौ। 'यजु' अर्थं षब्दार्थमज्ञित यज्ञम् 'यजु' गद्यबद्धऋचामपि वक्तुं षक्यते अतः यजुर्वेदः गद्ये अस्ति इति मन्यते। षुद्धगद्ये वा भागमस्ति तं षुक्लं तथा यस्मिन् छन्द अपि मिलति, ब्राह्मणमपि वा व्याख्यारपि तं कृष्णमुच्यन्ते, वा पद्यगद्यौ मेलितौ स्तः। यजुर्वेदः मूलतः यज्ञस्य कर्मकाण्डस्य वेदमस्ति यस्मिन् विभिन्नयज्ञानां विधानमस्ति, देवस्तुतयः सन्ति तेन सह गणित–विज्ञान–षुभकामनाः स्वस्तिवाचनं, षब्दकोषः समाजस्य विभिन्नस्य कार्यकलाशास्त्रदिय अपि मेलिताः सन्ति।

यजुर्वेदस्य १०० षाखाः यदा कदापि वर्तते इति मन्यते, कारणं पतंज्जलिना लिखितमस्ति। एकषतमध्यर्दुषाखाः। किन्तु अद्यत्वे कृष्णस्य त्रिस्रः तथा षुक्लयजुर्वेदस्य काव्यं तथा वाजसनेयश्च। वाजसनेय माध्यंदिनमपि समाविष्टमस्ति। यथा काण्वमाध्यंदिन–जाबाल–बुधेंय–षाकेयतायनीयकाणीस–पौडवडा–आवर्तिक–परमावर्तिक–पारापषरीय–वैनेय–बौधेय–यौधेय–मालवश्च उल्लेखानुसारमस्मिन् १६०० मन्त्राणि सन्ति।

कृष्णयजुर्वेदे मंन्त्रसंख्या कृष्ण यजुर्वेदस्य १८०० मन्त्राणि सन्ति। अस्मिन् सप्त काण्डाः सन्ति। प्रत्येक काण्डे प्रपाठकानुवादकेषु विभक्त मस्ति। षुक्ल यजुर्वेदस्य ४० अध्यायमस्ति । अन्तिमध्यायः इषावास्यामिदं सर्व मन्त्रात् आरम्भितं भवति, तथा :हिरण्यमयेन पात्रेण समाप्तं भवति। अनेन एव ईषावास्योपनिषद् उच्यते, कारणमस्मिन् रहस्यवादपि अस्ति, दर्षनमपि पराविद्या तथा परमतत्वस्य जिज्ञाषा तथा विवेचनमपि।

सामवेदं वेदत्रयाः अभिन्नअंगामसित। ऋक्–यजु–सामत्रयः वेदाः 'त्रयी' उच्यन्ते। अतः ऋक्–यजु–साम–अथर्वचर्तुवेदेषु अथर्ववेदः परवर्ती अस्ति इति केचन विद्वांसः मन्यन्ते किन्तु वेदेषु पद्यगद्यगीति तिस्रः षैल्यः उच्यते, अतः चतुर्वेदमेव त्रयी अस्ति तथा सर्वसमानरूपेण एकमेव वेदरूपकअंगामस्ति, इति स्पष्टकर्ता अनेकविद्वांसः चत्वारः समानरूपेण पुरातनंमन्यन्ते स्म। द्वयमेव द्वाभ्यामेव सृष्टिभ्यां सामवेदः अधिकपुरातनं सिद्धं भवति। स्वयं ऋग्वेदे अनेकवारमुल्लेखः जातः।

समवेदाय सहस्त्रवर्त्मा सामवेदः कथितः यस्य केचन जनाः योडर्थं कुर्वन्ति यत् अस्य केचन जनाः योऽर्थं कुर्वन्ति यत् अस्य सहस्त्रषाखारेव सामवेदस्य मिलन्ति 'कौमुथ संहिता' जैमिनिय संहिता तथा रामायणीय संहिता। कौमुथस्य गुजराते जैमिनियस्य कर्णाटके तथा रामायणीयस्य महाराष्ट्रे विषेषप्रचारमस्ति। पं. भगवददत्तेन स्ववैदिकवाङ्मयस्य इतिहासे यो उल्लेखमपि कृतमस्ति यत् महाभारतस्य १५० वर्षपूर्वे जातेन उपमन्युना औपमन्यवा षाखा प्रचालिता किन्तु अद्य न प्राप्यते। सामवेदे १८७५ मन्त्राणि मिलन्ति, यानि प्राप्यः सर्वाणि ऋग्वेदेऽपि प्राप्यन्ते। केवलं ७५ मन्त्राणि सन्ति यानि केवलं सामवेदे सन्ति अन्यत्र न। ताः ऋचाः गानषैली स्वरपितानं तथा समयविस्तारेण च एव सामरूपं मिलति। मन्यते यत् ऋचापाठं यस्मिन् काले भवति तसमात् त्रिगुणात्मककाले सामं गीयते। अतः 'ऋच साम' उच्यते। ऋच्यध्युढं साम

गीयते'' उक्त्वा तथा छान्दोग्योपनिषद 'ऋक् तत साम' उक्त्वा ऋग्वेदसामवेदयोरविनाभावसम्बन्धं सूचितं कृतमस्ति यत् प्रत्यक्षमपि द्दष्यते।

वेदानां अस्य प्राचीनपरम्परायां अपौरूष्यं तथा अनादिवाचा मन्यते। ताद्दषम् एव विश्वप्राचीनतमग्रन्थमसित। चतुर्वेदानां प्राचीनता असंदिग्धमस्ति किन्तु चतुर्णां पारस्परिकप्राचीनताप्रश्नमस्ति षोधविदुषां यत् मनमस्ति। ''चतुर्थः वेदः अन्ते योजितः' मूलतः त्रयः वेदारेव सन्ति ये त्रयी उच्चन्ते। गीतायां मनुस्मृत्यां तथान्यस्थानोपरी यो त्रयी षब्दमस्ति तस्याधारोपरी एव षोधविद्वान् एतादृषं कथ्यन्ते किन्तु अद्य अनेकप्राचीनग्रन्थसाक्ष्याधारोपरी स्पष्टं कृतं यत् चतुर्वेदाः प्राचीनाः सन्ति, अथर्ववेदः अन्ते योजितः इति कथानास्ति। त्रयी कथनस्य तात्पर्यमस्ति यत् वेदेषु त्रिविधासु मन्त्रवाक्यपंच्च मिलति, पद्ये गद्ये तथा गीतीसु। तिस्रः विद्याः एव त्रयी इति। अतः त्रयी षब्दार्थं नास्ति यत् वेदाः केवलं त्रयः सन्ति। ऋग्वेदे पद्यबद्धऋचाः सन्ति, सामवेदे गीतयस्तथा यजुर्वेदे गद्यम्। अथर्ववेदे पद्यमपि अस्ति तथा गद्यमपि। यत् मन्यते यत् प्राचीनाम् आर्याणां सम्पूर्णज्ञानं यत् वेदमुच्यते, पूर्वे एकसाकं विषालवाङ्मयरूपे विद्यमानम् आसीत्, तं सम्पादितं तथा वर्गीकृतं कृत्वा चतुर्वेदेषु विभाजितम्। तैतरियसंहिता तथा पुराणेषु यो उल्लेखं मिलति यत् सरलतायै विस्तृतवेदं चर्तुभागेषु विभाजितम् ताद्दषं सम्पादनं २८ वारं तथा तं सम्पादकं वेदव्यासः कथितः।

एताद्दषं सम्पादितचर्तुवेदेषु अथर्ववेदं तथा चतुर्थमन्तिमं मन्यते। तेन एव कारणेन कश्चित् पाश्चात्यविद्वद्भि अनन्तरं रचितः स्वीकृत स्तथा कथितमस्ति यत् षतपथब्राह्मणं अनन्तरं रचिता रचना अस्ति, कारणमस्मिन् तन्त्रं तथा मन्त्रविद्या वर्णितमस्ति। एतेषां विदुषां मान्यतास्ति यत् 'अर्थव' शब्दःईरानस्य अथर्वन् षब्दात् निर्गतः। यत् सत्यमस्ति यत् अथर्ववेद मन्त्रविद्यास्ति, तन्त्र स्यानेकाः प्रयोगाः सन्ति, अभिचारमस्ति, परम्परावादी आयुर्वेदप्रयोगमपि वर्णितमस्ति, किन्तु यो वेद अनन्तरं जानमिति धारणा परम्परावादी विद्वानमान्यं नास्ति। यदुल्लेखनीयम् अस्ति यत् भारतस्य अनेकविद्याः अरबदेशेषु अनुवादकारणेन पूर्वमेव गताः। येषां महत्वपूर्णग्रन्थानां फारसीभाषायामनुवादं जातमस्मिन् अथर्ववेदः प्रमुखम् अस्ति। 'आइने अकबरी' ग्रन्थें संकेतमस्ति। यत् यो फारसी अनुवादः अकबरस्य पुस्तकालये सुरक्षितमासीत्। यथा ऋग्वेदे प्राकृतिकषक्त्यः तत्वानि देवताच्च सूक्तप्रमुखमस्ति। यजुर्वेदे कर्मकाण्डं सामवेदे स्तुतयश्च ताद्दषमथर्ववेदे इहलोकव्यावहारिकोपयोगस्य अनेकाः विद्याः वर्णिताः सन्ति, यत् तस्मिन् काले मानवजीवनदैनिककोपयोगाय आवष्यकं मन्यते। अन्यषब्देषु तत्कालीनतकनीकिज्ञानसंकलनमपि वक्तुं षक्यते। अनया द्दष्ट्या चतुर्वेदानां मध्ये अथर्ववेदस्य अपूर्वस्थानमस्ति।

वेदान् ज्ञातुं योग्यता सम्पादितं कृत्वा तथा वेदोक्तकार्याणामनुष्ठानहेतुः व्यक्तिमर्हं कर्तुं शास्त्रं तं पाठयते तं वेदोगां वक्तुं परम्परा पुरातना अस्ति ज्ञायते यत् वेदकालानन्तरत्वादेव शास्त्राणि वेदाध्ययनाअंगभूतं मन्यते कारणं 'वेदांग' षब्देन अभिहितकरणमारम्भितं जातमासीत्। यत् शास्त्रं वेदाध्ययने सहायकं भवति अतः वेदो अंगीं अस्ति यदहामस्ति, यावधारणा यावत् 'यनयी' तावत् एव षड् वेदांगानि षिक्षा–कला–व्याकरण–निरूक्त–छन्द–ज्योतिषश्च वक्तुंमारम्भितं जातम्। कारणं गोपथब्राह्मण–बौधायन–धर्मसूत्र–गौतमधर्मसूत्रं यथा प्राचीनग्रन्थेषु अस्योल्लेखमस्ति, रामायणस्य बालकाण्डे अपि वेदागांना संकेतमस्ति, अतः ज्ञायते उत्तरवेदोक्तकालात् षड्वेदांगानां साहित्यं जातं, अस्मै शिक्षा दियते।

शिक्षा कल्पो व्याकरणे निरूक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदांगानि षऽेव तु।।

एताद्दषं तत् विगणितं तथा ताद्दषं रूपकं कृतम् एतेषु अंगेषु किं नेत्रस्थानं स्वीकरिष्यति, किं हस्तयोर्वा किं कर्णयोः।

छंन्दः पादौ तु वेदस्य हस्तौ कल्पऽय पठयत।
ज्योतिषामयनं चसुर्निख्क्लं श्रोत्र मुच्यते।।
शिक्षा पादौ तु वेदस्य हस्तौ कल्पोऽयं पाठयते।
तस्माद ज्ञानमयी त्यैव ब्रह्मलोके महीयते।।

उक्तवा छन्द पादौ, कल्पं, हस्तौ, ज्योतिषं नेत्रं, निरूक्तं, कर्णो, षिक्षां, नासिका तथा व्याकरणं मुखं दर्षितमस्ति वा कथितमस्ति। यानि भिन्नशास्त्राणि सन्ति, येषां ज्ञानमेतषां प्रत्येकानां अध्येतृणां कृते आवष्यकमस्ति, ये विद्वांसः, वेदज्ञाः ज्ञानी च भवितुमर्हन्ति। शिक्षा वर्णमाला तथा उच्चारणशास्त्रमस्ति, कल्यम् अध्येताजीवनचर्यां सफलतया सच्चालितकर्ता विधानमस्ति, व्याकरणभाषा तथा षब्दं पाठयति, निरूक्तं व्युत्पतिस्तथा अर्थं दर्षयति, तथा शास्त्रनाम अस्ति तथा ज्योतिषग्रहचारं तथा 'कलैण्डर' अनुसारं कालमापनकरणं पाठयति। अस्मिन् प्रायः सर्वार्हताविद्याः समाविष्टाः भवन्ति, कल्पः समस्तकृत्यानां विधानं भवति अतः यो कार्यकारी हस्तौ जातौ छन्द गतिर्नियमनकर्ता अस्ति तथा पादयोः कार्यम् अस्ति अतः तं पादौ उच्यते आकाषीयं ज्योतिदर्षनं नेत्रकार्यमस्ति, अतः ज्योतिषं नेत्रे जातं, उच्चारण–श्वास–प्रष्वासेन सह सम्बन्धितमस्ति अतः षिक्षां नासिकां कृत, षब्दं मुखात् उच्यते तथा अर्थं कर्णाभ्यां श्रृयतें अतः व्याकरणं मुखं तथा निरूक्तं कणौ कथितमस्ति। एताद्दषं वेदांगत्वात् अस्यौचिन्त्यमपि जातं तथा विभाजनस्य संगनिरपि जाता।

केचन विद्वांसः मन्यन्ते यत् वेदस्य अंगौः सहतात्पर्यमस्ति उपकारकस्यातः षड़ागांनि एकस्मात् 'ब्राह्मण' वक्तुं षक्यते कारणं वेदः यदि ब्रह्ममस्ति 'अर्थात् ज्ञान' अस्योपकारकं सर्वपदार्थाः ब्राह्मणं जातम्। तथापि यदि अंगी अस्ति वेदांगां तस्यागंन्तु वेदात् पृथक्क् नैव भवितुमर्हति अतः तकनीकिद्दष्टिः सक्परिभाषाकर्ता विद्वान् वेदांगानि अवयवं तथा वेदम् अवयवी अमत्वा अस्यानुषगिंकशास्त्रं वा उपकारकं मत्वा वेदांगशब्दस्य औचित्यं साधयति।

कौत्स द्वारा प्रतिपादितमेकमतानुसारं वेदस्य कोऽपि अर्थं नास्ति। यास्केन अस्य विरोधः कृतः, एतादृषं तेन जनाः वेदार्थं न जानन्ति, तुलना वेदस्य भारवाहकैः सह एव अस्ति। अस्यानुसारं यं वेदार्थज्ञानं प्राप्तं भवति यो पापमुक्तं भूत्वा स्वर्गं अग्रेसरं भवति। निरूक्तोपरी अनेकटीकाः जाताः, यथा दुर्गाचार्यः स्कन्दमाहेष्वरश्च वररूचिकृताः टीकाः।

निरूक्तः अनेकाविषयाणां निरूपणं करोति यन् व्याकरणस्यातिव निकटमस्ति तथा एतस्मै बहुधा निरूक्तं व्याकरणस्य एकमअंगा स्वीकृतमस्ति। यत् व्याकरणं

षड्वेदांगेषु प्रमुखस्थानं प्राप्तम् अस्ति। व्याकरणं वेदानां मुखमुच्यते। प्राचीनपरम्परानुसारं सर्वप्रथमं ब्रह्मणा व्याकरणस्य प्रवर्तनं कृतम्। अस्यानुसरणं बृहस्पति–इन्द्र–माहेष्वर–आदिभिः वैयाकरणैः कृतमस्ति। व्याकरणस्य सर्वप्रसिद्धकर्तापाणिनि अस्ति। यैः स्वयं महान् वैयाकरणानामनेकनामानामुल्लेखः कृतः। पाणिनिनः प्रसिद्धपुस्तकस्य नाम अष्टाध्यायी अस्ति। यस्मिन् वैदिकवैदिकेत्तरषब्दविवेचनं कृतमस्ति। प्रथमष्शतकेतः १४ ष्शतकेमध्येऽनेक्वैयाकरणैः पाणिनिनः अनुगमनं कृतमस्ति। केषाच्चित् जनानां विश्वासोऽस्मि यत् पाणिनि ७ ष्शतके ई. ५ जातमस्ति किन्तु अन्य जनाः अस्य कालं ४ ष्शतकें ई.स. ५ मन्यते।

व्याकरणस्य व्याख्यायां पतंज्जलेः महाभाष्यं सर्वश्रेष्ठं मन्यते। यो पाणिनिनः व्याकरणोपरी सर्वाधिकप्रमाणिकग्रन्थं मन्यते पतंज्जलेः एताद्यशा प्रामाणिकतास्ति यत् यत्रापि सूत्र–वार्तिक–महाभाष्ये मतभेदमसित यत्र पतंज्जलेः महाभाष्यस्य सिद्धान्तमेव अन्तिमरूपेण स्वीकार्यं मन्यते। पश्चिमि विदुषांमनुसारं पतंज्जली इ.पूर्व द्वितिय ष्शतके जातः। युधिष्ठिरः मीमांसक अस्य कालः विक्रमसंवत् २००० तः १२०० मध्ये मन्यते।

पाणिनि द्वारा प्रतिपादितव्याकरणस्य पठनपाठनयोः पद्धतेः स्थानं १६ ष्शतके कस्यचित् नियमानुसारं कातन्त्रं पद्धतिः स्वीकरोति स्म। अस्यां परम्परायां भट्टोजी दीक्षितकृतासिद्धान्तकौमुदी तथा नारायणभट्टकृतप्रक्रिया सर्वस्वाधिकप्रसिद्धम् अस्ति। दर्शनक्षेत्रेऽपि व्याकरणस्य विकासः जातः तथा अस्य प्रारम्भं भतृहरी द्वारा कृतस्तदा षड्ष्शतके जातः।

छन्दशास्त्रस्य पूर्णज्ञानसूचना वैदिकरचनाविधानेन मिलति। वैदिक छन्दरचनायाः प्रथमविवेचनं षांखायनश्रौतसूत्रे मिलति, किन्तु महर्षि पिंगलस्य छन्दशास्त्रम्प्रतिमशास्त्रयं ग्रन्थमस्ति। पिंगलेन छन्दसामध्ययनविवेचनं स्वग्रन्थछन्दसूत्रस्य अष्टाध्यायेषु कृतमस्ति। अस्मिन् ग्रन्थें तेन केवलं वैदिकछन्द न किन्तु अस्यातिरिक्तमन्यप्रकाराणां छन्दसां विवरणं दत्तमस्ति। मुख्यवैदिकछन्दसप्त सन्ति, तेन गायत्री–उष्णिक–अनुष्टुप–बृहति–पंक्ति–त्रिष्टुभ–जगनिनामभिः ज्ञायते। कात्यायनस्य अनुसारं वेदे मंत्राणां सर्वाधिकसंख्या त्रिष्टुभछन्दसां प्राप्यते। अस्य संख्या ४२५३ मन्त्राणि सन्ति। गायत्री छन्दसि २४६७ मन्त्राणि, जगती छन्दसि १३५० मन्त्राः अनुष्टुप छन्दसि ८५५ मन्त्राः उष्णिक छन्दाि ३४१ मन्त्राः पंक्ति छन्दसि ३१२ तथा बुहनि छन्दासि १८१ मन्त्राः सन्ति। यद्यपि छन्द संख्या अनेका अस्ति किन्तु सस्कृते केवलं ११५० छन्द प्राप्यते।

पिंगलाचायपूर्वे छन्दशास्त्रस्य अनेकमहानत्वार्याः यथा कौष्टुकि–यास्क–काष्यपश्च माण्डस्यादयः जाताः। पिंगलाचार्यस्य छन्दसूत्रोपरी अपि अनेकटीकाः जाताः। वस्तुतः संस्कृतसाहित्ये छन्दशास्त्राकपरी ग्रन्थानां संख्यारूत्तरोत्तरः विकासः जातः।

संगीतशास्त्रस्य विकासः छन्दशास्त्रस्य अनेकत्रऋणी अस्ति। ये तु भलीभाति ज्ञातम् अस्ति सामवेदस्य रचनागायनाय जाता। यद्यपि सामवेदस्य गायनस्य पद्धतिः शास्त्रीयसंगीतस्य गायनस्य पद्धत्यां भिन्नम् असित तथापि सप्तस्वराः षड्ज–ऋषभ–गान्धार, मध्यम्–पुचम–धैवत–निषादानां प्रयोगः सामवेदेऽपि तादृषमेव भवति, यथा शास्त्रीयसंगीते भवति। सामवेदात् सम्बन्धः छान्दोन्योपनिषदि सामवेदस्य पंच्चप्रकारस्य प्रस्तुतियानां निर्देषमस्ति यथा हिंकार–प्रस्ताव–उदगीथ–प्रतिहार–निष्पानच्च। यो ध्यातवाम् अस्ति यत् वैदिकसाहित्ये वीणासहितमनेकवाद्ययन्त्राणाभुल्लेखः मिलति। सामाजिके जीवनेऽपि संगीतं तथा धार्मिक कृत्यानां धनिष्ठताकारणमनेकरागाणां विकासः जातः। विशेषता षड्ऋतुनांमनुसारं षड्रागाणाम्। संगीत–नृत्य–नाटकोपरी प्रभूतसाहित्योपलब्धं भवति। वस्तुनः संगीत–नृत्य–प्रत्येकयुगे राजाश्रयं प्राप्तं प्राप्तं जातं तथोत्तरं तथा दक्षिणभारतस्य अनेकसम्राटाः स्वयं महान् संगीतज्ञाः आसन्।

शिक्षा–छन्द–व्याकरणैः धनिष्ठरूपेण सम्बन्धं साहित्यंप्रातिषाख्यंनाम्ना ख्यातमस्ति। प्रत्येकवेदस्तथा षाखासम्बन्धितनिश्चितनाम अस्ति। ये नियमाः उच्चारण–छन्द–व्याकरण–अन्य अनेक विभिन्नविषयैः सम्बन्धितमस्ति। प्रातिषाख्यां वेदस्य अर्थोऽपि संकेतितमस्ति। अतः अस्य सम्बन्धितवेदाध्ययने सहायकं मन्यते। ऋक्प्रातिषाख्यं ऋग्वेदस्य षाकलषाखायाः षैषीरीयोयषाखाविवेचनं करोति। अस्य कर्ता महर्षि षौनकमस्ति। महान भाष्यकारेण उवटेन अस्य प्रातिषाख्याभाष्यं लिखितम् अस्ति इति मन्यते यत् ऋक् प्रातिषाखायाः रचना ई. पू. ६ षताब्दी मध्ये जाता। उच्चारणानां विधिर्पाठनं गुरोः प्रथमकार्यं वर्तते अतः उच्चारणपाठने स्वर–वर्णमाला–आदिनां ज्ञानकारयितुं शास्त्रं शिक्षा कथितम् अस्ति। शिक्षा शब्दः'षिक्ष विद्यापादाने' धातोः अपि भवति, 'षक्लू षन्तो' षक्लोः षक्तो भवितुमिच्छति अर्थे सन् तथा णड् भूत्वा षिक्षते भवति वा विद्यासामर्थ्यार्जितकरणं षिक्षास्ति। यो षब्दो यद्यपि प्राचीनासु संहितासु नागतः किन्तु परवर्ती साहित्ये पर्याप्तप्रचलितोऽस्ति। एकस्य वेदांगस्य अर्थे अधिकषिक्षार्थं अर्थे अपि अस्ति।

श्रुतिनां षुद्धोचारणं तथा उत्तमप्रस्तुतेः महत्वं वेदकालादेव दर्षितमस्ति। एकस्य स्वरस्य उच्चारेण न्यूनमपि क्षतिः अर्थस्यानर्थं कर्तुं षक्नोति। यथा कथा प्रसिद्धास्ति यत् एकवारं त्वष्ट्या यज्ञकरणमिच्छितं येन इन्द्रं तापकर्ता उत्पन्नं भवेत् किन्तु इन्द्रषत्रुवर्धस्व अस्मिन् इन्द्रषत्रु षब्दे अन्त्योदातस्थाने आद्युदातोच्चारस्य क्षत्या यो उत्पन्नः जातः किन्तु यस्य मारणकर्ता इन्द्रोऽस्ति इति तत्पुरूषस्थानं बहुव्रीहिरर्थः जातस्तथा विपरितं परिणामं जातम्।

'शिक्षा वेदांगस्य षऽगांनि सन्ति। वर्ण–स्वरः–मात्रा–बल– साम–संतानश्च येन उच्चारणं पाठयते। वर्णमाला अस्य प्रस्थान–यत्नादयः पूर्वं पाठ्यते पश्चात् हस्व–दीर्धः–प्लुतः–उदात–अनुदात्त–स्वरित–प्रचयादयः स्वरभेदाः इति। गुरूलधूमात्रात तथा अनेन गतियतिसु भेदाः महत्वपूर्णं भवति। तेन सह विभिन्नवर्णोच्चारणानि तथा पाठेषु कस्य प्रकारस्य प्रयत्नस्तथा षवासादिभिः ध्वनिः क्रियते यत् 'बल' विषयं वर्तते। श्रुति मधुरप्रस्तुतिर्षिक्षा 'सामे' तथा व्यूहितं वा समूहितंसंहितं वा अरूहितपाठशिक्षा संज्ञाने दियते। अस्मिन् उच्चारणशास्त्रं वा ध्वनेः स्थानिकस्य मूलभूतसिद्धान्ताः एताद्दषं समाहिताः आसन् यत् मानवस्वरयंत्रात्यन्तोन्नतं तथा

सर्वांगीणं प्रशिक्षणम् एतया षिक्षया भवति स्म। तदा एव वाल्टर स्टेकर्ड एलनवदाधुनिकैः पाश्चात्यभाषाषास्त्रिभिः प्राचीनयाज्ञवल्क्यशिक्षा तथा पाणिनीयषिक्षामूलसिद्धान्ताः दत्वा लिखितमासीत् यत् तस्मिन् प्राचीनकाले भारते ध्वनिशास्त्रं वा स्वानिक्याः यादृषं सर्वागपूर्णं परिज्ञानमासीत् आधुनिकवैज्ञानिकेभ्यः अपि आश्चर्यवस्तु भवितुमर्हति।

एतादृषं प्रतितं भवति यत् उच्चारणशास्त्रप्रवर्तकाचार्यरूपे याज्ञवल्क्यनाम पूर्वादेव प्रचलितमासीत् तथा षिक्षापि प्रसिद्धा एव आसीत् यस्याधारोपरी या याज्ञवल्क्यशिक्षा लिखिता या अद्य उपलब्धम् अस्ति। एतदनुमानमस्याधारोपरी कर्तुं षक्यते यत् षुक्लयजुर्वेदस्य वाजसनेयीसंहिता यस्याधारोपरी याज्ञवल्क्य दृष्यते यत् यसस्य प्रश्नसमाधानमनेन भवति। याज्ञवल्क्यं षुक्लयजुर्वेदस्य दृष्टा, प्रवक्ता इति उच्यते, तथा संहितायां कस्यचिदपि मन्त्रस्य दृष्टारूपे याज्ञवल्क्यनाम अप्राप्यते। वेदेषु याज्ञवल्क्यस्य उल्लेखं नागच्छति, षतपथब्राह्मणेऽवष्यमागच्छति यस्याधारोपरी वक्तुं षक्यते यत् वाजसनेयीपुत्रः वाजसनेयः याज्ञवल्क्येन षुक्लयजुर्वेदोपदेशेः कृतः। तेन कारणेन षुक्लयजुर्वेदः तथा कृष्णयजुर्वेदविभाजनं जातम्। विष्णुपुराणादिनि पुराणानि अपि तां कथां वर्णयन्ति यत् आचार्य वैषम्पायनं कस्यचित् प्रायश्चितस्य प्रसंगों सार्वयाजुयः कर्तव्यो आसीत् अतः स्वकीय सर्वषिष्यसाहारूपेण सर्वयजुनामाहूतिः ददन् यज्ञकर्तुं सर्वाः आहवहयताः। याज्ञवल्क्येन कथितं यत् अहमेकाकी एव अलमस्मि कारणं मया एकया विषिष्टपद्धत्या सर्वयजुस्मृतिः कृताः। अस्य अनेन अहंकारेण वैषम्पायनः क्रुद्धः जातस्तथा तेन आदेशेः कृतः यत् सम्पूर्णवेदः वमनं कुरू। कैश्चिदन्दषिष्यैः तीतरं भूत्वा तेभ्यः केचन् आरोगिताः अतः अस्य नाम तैत्तिरीयसंहिता जातम्।

एषा कथा एकं रहस्यमयं जातम्। स्पष्टमस्ति यत् यत् प्रतिकात्मकमस्ति। वमनकरणं तथा आरोगत्वं वास्तविकधटना कया रीत्या भवितुमर्हति। अस्योपरी पाश्चात्यैः समीक्षकैः काश्चन् प्रतिक्रियाः कृताः, अनेकानि चिन्तनानि कृतानि च। वस्तुतः अस्य रहस्यमस्मान् प्रतियते यत् ऋचाः छन्दोबद्धत्वात् सहजमेव कण्ठस्थं भवति। यजु पूर्णकण्ठस्थं न भवति अतः याज्ञवल्क्येन उच्चारणपाठयोः एका लयात्मका विधिः अन्वेषिता यया पूर्णसंहिता कण्ठस्थकरणं सरलं जातम्। यदि तपा विधिना पठितसंहितां याज्ञवल्क्स्य वा वाजसनेयी वक्तुं प्रतिकानुसारं समुचितं भवति। यत्र याज्ञवल्क्यशिक्षा उच्चारणशास्त्रमपि जातं तथा अस्य पाठस्य विधेः शास्त्रमद्यपर्यन्तं प्रचलनस्ति। भवितुम् अर्हति यत् तस्मिन् काले मूलयाज्ञवल्क्यषिखा कापि अन्या भवितुमर्हत किन्तु याज्ञवल्क्यं षिक्षाशास्त्रप्रवक्तां स्वीकर्तुं एतदेव रहस्यं प्रतितं भवति। अस्यां याज्ञवल्क्यषिक्षायाः स्वानिकयाः उत्कृष्टादिग्रन्थं वर्तते इति कथा दनेकैः पाश्चात्यध्वनिशास्त्रीभिः कथिता यत् पष्य वयम् उल्लेखमकरोम्। यत् स्पष्टमस्ति यत् गद्यस्य उच्चारणस्य यादृषा लयेजादा न कृता न कृता चेत् अद्य पूर्णसंहिता कण्ठस्थकर्ता वेदपाठी यथा सरलतया मिलति, तथा सर्दीभिः एषा परम्परा प्रचलन्ती अस्ति तादृषं कथापि सम्भवं न भवति।

द्वितियवेदांग कल्पं मन्यते। कल्पं हस्तभूमिकां दातुमर्थमस्ति प्रविधी वा कार्यकरणरीतिस्तथा मार्गदर्षनप्रक्रियादर्षकधटकं वा शास्त्रं कल्पं वक्तुं षक्यते। आंगलें एताद्यशा मार्गदर्षकप्रक्रिया पुस्तिकाः मैनुडल वक्तुं षक्यते, यो षब्दोऽपि हस्तवाचकषब्देन जातः। ऋग्वेदप्रागतिषाख्यम् उच्यते 'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्'। वेदोक्तकर्मणां क्रमषः विधिः दर्षयितुं शास्त्रं कल्प प्रमुखतः सूत्रेषू लिखितानि सन्ति। अतः तानि अल्पसूत्रनाम्ना अपि उच्यते। कल्पयन्ते प्रयोगविषयी कियन्ते कर्माणि येन स कल्पः। सामान्यतः चर्तुव्रकाराणां कल्पसूत्राणि उपलब्धानि भवन्ति।श्रोतसुत्र–गृह्मसूत्र–स्मार्तसूत्र–षुल्वसूत्रश्च केषाश्चित् श्रोतकर्माणां विधानपर्यन्तं सीमितं भूत्वा पंच्चकल्प विगण्यते। नक्षत्र–कल्प–वैतनकल्प–कल्प–अंगिरसकल्प– षान्ति कल्पश्च।

श्रोतसूत्रे यज्ञकर्मभेद–प्रकार–पद्धति–विधानवत् च षोडषसंस्काराः दैनन्दिनकृत्यआदः वर्णिताः सन्ति। स्मार्तसूत्रे धर्मशास्त्रमागच्छति यत् कृत्यं तथा आचरणस्य व्यवस्थां ददाति तथा षुल्बसूत्रं वैदिककृत्यानां उपयुक्तवदी–भवनाद्याधारसामग्रीविधानमाप –निर्माणप्रकारादः दर्षयति ये एकदृष्ट्या रखागणनमूलस्त्रोतं वक्तुं शक्यन्ते येषु निर्माणशास्त्रबीजमपि निहितमस्ति।

श्रोतसूत्रेषु यज्ञविधानं वर्णितमस्ति। यस्मिन् यज्ञानां प्रकारास्तथा विधिः दर्षयेत्। ऋग्वेदसम्बन्धितषांख्यानाश्वालायनश्रोतसूत्राणि सन्ति। कृष्णयजुर्वेदस्य श्रोतसूत्रमस्ति आपस्तम्ब–हिरण्यकेषी–बौधायन–भारद्वाज–मानव–वैखानसश्च। षुक्लयजुर्वेदस्य कात्यायनश्रोतसूत्र सामवेदमषक–लाद्यायन–ब्रादायणश्रोतसूत्र अर्थववेदस्य वैतान श्रोतसूत्रं सूत्राणां वाङ्मयमपि विस्तृतमस्ति, यद्यपि समयेन सह कानिचन श्रोतसूत्राणि अल्पज्ञातानि जातानि कारणं मध्यकाले श्रोताग्निस्थापनश्रोतयागकरणपरम्परा अधिका विरला जाता। परिणामं जातं यत् षोड्षसंस्कारादिनां कृते गृहयसूत्राणां ज्ञानम् अवष्यं जातं किन्तु धर्मसूत्राणिः तथा तैः सह अन्यसूत्रसाहित्यं विरलं जातं क्रमषः धर्मसूत्राणां पठननपाठनं जातम्। अनेन स्पष्टं भवति यत् श्रोतसूत्रेषु श्रोताग्णौ करियानि पागानि वर्जितत्वाद तथा अधिकसंख्यासु अकरणत्वाद् श्रोतसूत्राणां विरलत्वं स्वाभाविकमस्ति। उदाहरणार्थं ऋग्वेदिनां षांख्यायनश्रोतसूत्रे अष्टादषअध्यायाः सन्ति येषु दर्ष–पौर्ण–मासादिनां यज्ञानां विधानानन्तरं वाजपेय–राजसूय–अश्वमेध–पुरूषमेध–सर्वमेधयज्ञानमेव विधानं दर्षितमस्ति। राजसूयाश्वमेधचकवर्ती राजा द्वारा कारणीयं विद्यते, वाजपेयी अपि श्रोत्रियं वा राजा द्वारा करणिययज्ञेऽस्ति षांखायनसूत्रोपरी अमृतभाष्यं तथा गोविन्दकृतटीका मिलति।

वाजसनेयी प्रातिषाख्यरचना कात्यायनेन कृता यो पाणिनिपूर्वे जातः। कात्यायनस्य प्रातिषाख्यस्य कृते उवटानेतभट्टाभ्यां क्रमषः नातृवेदस्य पदार्थोप्रकाषस्य च रचना कृता। तैत्तिरियप्रातिषाख्यसम्बन्धं कृष्णयजुर्वेदस्य तैत्तिरियसंहिता सह अस्ति। अस्मिन् उपरी महषियेन टीका कृतास्ति यया पदकमसननाम्ना ज्ञायते।

पुष्पसूं तथा अक्तन्त्रनाम्नः प्रतिषाख्यद्वयं कामवेदस्य अस्ति। पुष्पसूत्रस्य कर्ता वररूचिस्तथा अक्तन्त्रं षाकायनं मन्यते। अथर्ववेदस्य प्राचीनतमप्रातिषाख्यं

चतुराध्यायिका अस्ति। कौत्सकम् अस्य प्रातिषाख्यस्य कर्ता कथितः। कौसः व्याकरणस्य नाम्ना अपि ज्ञायते।

षड्तमं ज्योतिषमस्ति यत् खगोलशास्त्रं तथा गणितज्योतिषसम्बन्धि अस्ति। ज्योतिषं प्रकाषविज्ञानं मन्यते तथा तथा अयं वेदांगेषु नेत्रसंज्ञा दीयते। वैदिकप्रज्ञया ब्रह्माण्डीयगत्यामेकमान्तरिकलयान्वेषणं कृतं तथा यो लयः मानवजीवनस्य ऋतुकालक्रमिकविकासानाम् अनुकूलं प्रतितं भवति। कालस्य कल्पनाक्रियायाः ताद्यशा निरन्तरतारूपे कृता या मनुष्यमिच्छानां स्फुरणविकासं तथा यज्ञं परस्परं धनिष्ठरूपेण योजिताः सन्ति। अतः यज्ञस्य प्रारम्भस्य पूर्णाहूतिमुहूर्तस्य निर्धारणं महत्वपूर्णं ज्ञायते। परिणामतः नक्षत्राणां परिवर्तनं दिनरात्रिगणना तथा विभिन्नऋतुराषयः राहुकेतुस्तथा अन्याकाषीयनक्षत्राणमर्वतनविवर्तमादिनां वर्णनं क्रियते। ग्रहनक्षत्राणां गतिविधि अनुसारम् एव मानवजीवनस्य शुभाषुभपरिणामाणां भविष्यवाणी क्रियते, यत् खगोलशास्त्राधारितमस्ति।

लगधाचार्यं ऋग्वेदज्योतिषवेदांगस्य कर्ता मन्यते। अस्मिन् ३६ छन्द अस्ति। यजुर्वेदः तथा अथर्ववेदसम्बन्धितज्योतिषं वेदांगम् अस्ति। यजुर्वेदज्योतिषे ३४ छन्द अस्ति तथा अस्य कर्ता श्रोषाचार्योऽस्ति। अथर्ववेदज्योतिषे १४ अध्यायास्तथा १०२ छन्द सन्ति। यस्य वक्ता पितामहः तथा श्रोताकाष्ययस्य संवादं मन्यते।

भारतस्य महानतमं खगोलशास्त्री अस्ति तथा गणितज्योतिषज्ञातासु वराहमिहिरस्य नाम ख्यातमसित। अस्य प्रसिद्धपुस्तकं पंच्वसिद्धान्तिकायाः ज्योतिषपंच्वपद्धतिनाम् उल्लेखं मिलति तर्हि अधोलिखितमस्ति,
पितामह–सिद्धान्त–वषिष्ठ–रोमक–पौलिस–सिद्धान्तं तथा सूर्यसिद्धान्तम्। कालान्तरं ज्योतिषेण अनेकविज्ञानगणितबीजगणितज्यामिति–ज्योतिषगणितखगोलशास्त्रविकासप्रेरणा दत्ता। भास्कराचार्यं मध्ययुग गणितज्ञज्योतिषज्ञानिसु प्रथमं मन्यते। ज्योतिषमद्यं अपि सम्पूर्णं भारते प्रचलितमस्ति तथा अधुना अपि एतत् विकासमानविज्ञानमस्ति। पंच्वागं यत् तिथि–वासर–नक्षत्र–योग–करणानां विस्तृतं वर्णनं ददाति।

**निष्कर्ष**

अस्य वेदांगेन सह अन्यानि चत्वारि शास्त्राणि कलाश्च सन्ति, यानि उपवेदमुच्यन्ते। ऋग्वेदस्य उपवेदः आयुर्वेदमस्ति यजुर्वेदस्य उपवेदः धनुर्वेदमस्ति, सामवेदस्य गन्धर्ववेदस्तथा अथर्ववेदस्य उपवेदः अथर्ववेदमस्ति। आयुर्वेदस्य सम्बन्धमत्युरहस्यं तथा दीर्घायुषोषणरक्षणं तथा दर्षनस्य कला वा विज्ञानेन सह अस्ति। आयुर्वेदस्य आधककर्ता धन्वन्तिरि मन्यते। तेन सह आत्रेय–काष्यप–हासीत–अग्निवेष–भेदामुनिनां नामानि प्रमुखानि सन्ति तस्मिन् काले आयुर्वेदस्य त्रिणि महत्वपूर्णपुस्तकानि।

सन्ति–चरकसंहिता–सुश्रुतसंहिता–वाग्भट्टसंहिता त्रयाणां च सामुहिकनाम बृहत्त्रयी अस्ति। धनुर्वेदः युद्धकला तथा अस्त्रषस्त्रैः सह सम्बन्धितमतिव प्राचीनशास्त्रं प्रतियते। रामायणे महाभारते युद्धवर्णनं तथा युद्धशास्त्रं वा कला उपरी पर्याप्तप्रकाषः कृतः। धनुर्वेदस्य अतिव प्राचीनपुस्तकानि उपलब्धानि न सन्ति, किन्तु कानिचन् प्रस्तकानि ज्ञातानि सन्ति, एतेषु धनुविधि–द्रोणविधि–कोदण्डमण्डन–धनुर्वेदसंहिता प्रमुखमस्ति। परम्परायाः अनुसारं धनुर्वेदस्य प्रारम्भकर्ता स्वयं महादेवोऽस्ति। द्रोणाचार्येण यत् शास्त्रं परशुरामात् ज्ञातं यत् अर्जुनेन द्रोणाचार्यात् प्राप्तम्। अर्जुनेन या कला सत्यन्याः ज्ञाता।

**सन्दर्भ ग्रन्थ सूची**

Keith, Arthur Berriedale. *The religion and philosophy of the Veda and Upanishads*. Motilal Banarsidass Publishe, 1989.

Mishra, Satendra Kumar, and Srashti Srivastava. "Sanskrit: Loss of the language of love." *International journal of linguistics, literature and culture* 3.2 (2017): 92-99.

Oldenberg, Hermann. *The religion of the Veda*. Motilal Banarsidass Publ., 1988.

RAJA, K. KUNJUNNI. "The Sanskrit Scene: Only a Handful, as usual." *Indian Literature* 29.6 (116 (1986): 145-148.

Srivastava, Prem Shankar. "Spiritual education in Vedic philosophy."

Tiwari, Shashi. "Origin of Environmental Science From Vedas." *Access on* 21 (2009): 2017.

Upadhyay, B. "Vedic sahitya aur sanskruti." (1967): 436-450.

Van Nooten, Barend A., and Gary B. Holland, eds. *Rig Veda: A metrically restored text with an introduction and notes*. Department of Sanskrit and Indian Studies, Harvard University, 1994.